ब्रह्म-रन्ध्र में स्थित सहस्र-दल-पद्म के दिव्य चक्र में समस्त विश्वों के स्वामी पर-नाथ एवं आदि-नाथ मेरी रक्षा करें ॥१

श्री-नाथ शिर में और श्री-पति सिद्धि-दल में रक्षा करें। वाग्-देवी, दुर्ग-नाथ और दुर्गति-नाशिनी दुर्गा सदा कण्ठ-स्थान के षोडशार-चक्र में और स्वर में तथा ईश्वर, भैरवी-नाथ, नाथ, ईशान भैरव काल की रक्षा करें ॥२-३

द्वादशार-चक्र में कालान्त-कृत वीर-भद्र और नाभि-स्थान में रुरु-नाथ भैरव मेरी रक्षा करें ॥४

चक्र-नाथ परात्पर गुरुदेव सदा रक्षा करें। षड्-दल चक्र में और काम-नेत्रों में सदा काम-देव रक्षा करें ॥५

अण्ड-कोषों में मत्स्य-नाथ मत्स्येन्द्र रक्षा करें। गोरक्षनाथ मूलाधार के चतुर्दल-चक्र में सदा रक्षा करें ॥६

चतुर्दल चक्र में और सिर से लेकर गुदा तक के सभी चक्रों में मेरे गुरुदेव श्री भर्तृहरिनाथ मेरी रक्षा करें ॥७

पैरों से सिर तक विश्व-नाथ विष्णु, इष्ट-देव, इष्ट-पति, विश्व-सृक्, गुरु-नाथ सदा मेरी रक्षा करें ॥८

(२)

पुरश्चरण-रसोल्लासे ईश्वर-देवी-सम्वादे

श्रीगुरु-कवचं

पूर्व-पीठिका

।। श्रीईश्वर उवाच ।।

श्रृणु देवि ! प्रवक्ष्यामि, गुह्याद्-गुह्य-तरं महत् ।
लोकोपकारकं प्रश्नं, न केनापि कृतं पुरा ।।
अद्य प्रभृति कस्यापि, न ख्यातं कवचं मया ।
देशिकाः बहवः सन्ति, मन्त्र - साधन - तत्पराः ।।
न तेषां जायते सिद्धिः, मन्त्रैर्वा चक्र - पूजनैः ।
गुरोर्विधानं कवचमज्ञात्वा क्रियते जपः ।
वृथाश्रमो भवेत् तस्य, न सिद्धिर्मन्त्र - पूजनैः ।।
गुरु-पादं पुरस्कृत्य, प्राप्यते कवचं शुभम् ।
तदा मन्त्रस्य यन्त्रस्य, सिद्धिर्भवति तत्-क्षणात् ।
सु-गोप्यं तु प्रजप्तव्यं, न वक्तव्यं वरानने ।।

।। सविधि श्रीगुरु-कवच-स्तोत्रम् ।।

विनियोगः—ॐ नमोऽस्य श्रीगुरु-कवच-नाम-मन्त्रस्य परम-ब्रह्म ऋषिः, सर्व-वेदानुज्ञो देव-देवो श्रीआदि-शिवः देवता, नमो ह्सौं हंसः ह-स-क्ष-म-ल-व-र-यूं सोऽहं हंसः बीजं, स-ह-क्ष-म-ल-व-र-यीं शक्तिः, हंसः सोऽहं कीलकं, समस्त-श्रीगुरु-मण्डल - प्रीत्यर्थे जपे विनियोगः ।

ऋष्यादि-न्यासः—श्रीपरम-ब्रह्मर्षये नमः शिरसि । सर्व-वेदानुज्ञ-देव-देव श्रीआदि-शिव-देवतायै नमः हृदि । नमः ह्सौं हंसः ह-स-क्ष-म-ल-व-र-यूं सोऽहं हंसः बीजाय नमः गुह्ये । स-ह-क्ष-म-ल-व-र-यीं शक्तये नमः नाभौ । हंसः सोऽहं कीलकाय नमः पादयोः । समस्त-श्रीगुरु-मण्डल-प्रीत्यर्थे जपे विनियोगाय नमः अञ्जलौ ।

षडङ्ग-न्यास	कर-न्यास	अङ्ग-न्यास
ह्सां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ह्सीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
ह्सूं	मध्यमाभ्यां नमः	शिखायै वषट्
ह्सैं	अनामिकाभ्यां नमः	कवचाय हुं
ह्सौं	कनिष्ठाभ्यां नमः	नेत्र-त्रयाय वौषट्
ह्सः	करतल-करपृष्ठाभ्यां नमः	अस्त्राय फट्

ध्यान--

श्रीसिद्ध-मानव-मुखा गुरवः स्वरूपं, संसार-दाह-शमनं द्वि-भुजं त्रि-नेत्रम् ।
वामाङ्ग-शक्ति-सकलाभरणैर्विभूषं, ध्यायेज्जपेत् सकल-सिद्धि-फल-प्रदं च ।।

मानस-पूजन---

लं पृथिव्यात्मकं गन्ध-तन्मात्र-प्रकृत्यात्मकं गन्धं स-शक्तिकाय श्रीगुरवे समर्पयामि नमः,
हं आकाशात्मकं शब्द-तन्मात्र-प्रकृत्यात्मकं पुष्पं स-शक्तिकाय श्रीगुरवे समर्पयामि नमः,
यं वाय्वात्मकं स्पर्श-तन्मात्र-प्रकृत्यात्मकं धूपं स-शक्तिकाय श्रीगुरवे घ्रापयामि नमः,
रं वह्न्यात्मकं रूप-तन्मात्र-प्रकृत्यात्मकं दीपं स-शक्तिकाय श्रीगुरवे समर्पयामि नमः,
वं अमृतात्मकं रस-तन्मात्र-प्रकृत्यात्मकं नैवेद्यं स-शक्तिकाय श्रीगुरवे समर्पयामि नमः,
सं सर्वात्मिकां ताम्बूलादि-सर्वोपचार-पूजां स-शक्तिकाय श्रीगुरवे समर्पयामि नमः ।

।। कवच-स्तोत्रम् ।।

ॐ नमः प्रकाशानन्द-नाथः तु, शिखायां पातु मे सदा ।
पर-शिवानन्द-नाथः, शिरो मे रक्षयेत् सदा ।।१
पर-शक्ति-दिव्या-नन्द -नाथो भाले च रक्षतु ।
कामेश्वरानन्द,-नाथो, मुखं रक्षतु सर्व-धृक् ।।२
दिव्यौघो मस्तकं देवि ! पातु सर्व-शिरः सदा ।
कण्ठादि-नाभि-पर्यन्तं, सिद्धौघा गुरवः प्रिये ।।३
भोगानन्द-नाथ गुरुः, पातु दक्षिण-बाहुकम् ।
समयानन्द-नाथश्च, सन्ततं हृदयेऽवतु ।।४
सहजानन्द-नाथश्च, कटिं नाभिं च रक्षतु ।
एष स्थानेषु सिद्धौघाः, रक्षन्तु गुरवः सदा ।।५
अधरे मानवौघाश्च, गुरवः कुल-नायिके !
गगनानन्द-नाथश्च, गुल्फयोः पातु सर्वदा ।।६
नीलौघानन्द-नाथश्च, रक्षयेत् पाद-पृष्ठतः ।
स्वात्मानन्द-नाथ-गुरुः, पादांगुलीश्च रक्षतु ।।७
कन्दोलानन्द-नाथश्च, रक्षेत् पाद-तले सदा ।
इत्येवं मानवौघाश्च, न्यसेन्नाभ्यादि-पादयोः ।।८
गुरुर्मे रक्षयेदुर्व्यां, सलिले परमो गुरुः ।
परापर-गुरुर्वह्नौ, रक्षयेत् शिव-वल्लभे ।।९

परमेष्ठी - गुरुश्चैव, रक्षयेत् वायु - मण्डले ।
शिवादि - गुरवः साक्षात्, आकाशे रक्षयेत् सदा ।।१०
इन्द्रो गुरुः पातु पूर्वे, आग्नेयां गुरुरग्नयः ।
दक्षे यमो गुरुः पातु, नैऋत्यां निऋतिर्गुरुः ।।११
वरुणो गुरुः पश्चिमे, वायव्यां मारुतो गुरुः ।
उत्तरे धनदः पातु, ऐशान्यामीश्वरो गुरुः ।।१२
ऊर्ध्वं पातु गुरुर्ब्रह्मा, अनन्तो गुरुरप्यधः ।
एवं दश - दिशः पान्तु, इन्द्रादि - गुरवः क्रमात् ।।१३
शिरसः पाद - पर्यन्तं, पान्तु दिव्यौघ - सिद्धयः ।
मानवौघाश्च गुरवो, व्यापकं पान्तु सर्वदा ।।१४
सर्वत्र गुरु - रूपेण, संरक्षेत् साधकोत्तमम् ।
आत्मानं गुरु - रूपं च, ध्यायेन् मन्त्रं सदा बुधः ।।१५

फल-श्रुतिः

इत्येवं गुरु - कवचं, ब्रह्म - लोकेऽपि दुर्लभम् ।
तव प्रीत्या मया ख्यातं, न कस्य कथितं प्रिये ।।१
पूजा - काले पठेद् यस्तु, जप - काले विशेषतः ।
त्रैलोक्य - दुर्लभं देवि ! भुक्ति - मुक्ति - फल-प्रदम् ।।२
सर्व - मन्त्र - फलं तस्य, सर्व - यन्त्र - फलं तथा ।
सर्व - तीर्थ - फलं देवि ! यः पठेत् कवचं गुरोः ।।३
अष्ट - गन्धेन भूर्जे च, लिख्यते चक्र - संयुतम् ।
कवचं गुरु - पङ्क्तेस्तु, भक्त्या च शुभ - वासरे ।।४
पूजयेत् धूप - दीपाद्यैः, सुधाभिः सित - संयुतैः ।
तर्पयेत् गुरु - मन्त्रेण, साधकः शुद्ध - चेतसा ।।५
धारयेत् कवचं देवि ! इह भूत - भयापहम् ।
पठेन्मन्त्री त्रिकालं हि, स मुक्तो भव-बन्धनात् ।
एवं कवचं परमं, दिव्य - सिद्धौघ - कलावान् ।।६

हिन्दी श्रीगुरु-कवच

॥ पूर्व-पीठिका ॥

श्री ईश्वर बोले-– हे देवि ! संसार के लिए कल्याणकारी प्रश्न तुमने पूछा है, जिसे पहले किसी ने नहीं पूछा। अत्यन्त गोप्य से भी गोपनीय उसे मैं कहूँगा। यह 'कवच' आज तक मैंने किसी से नहीं कहा है। मन्त्र-साधना में बहुत से साधक तत्पर रहते हैं किन्तु उन्हें मन्त्रों या चक्र-पूजनों के द्वारा सिद्धि नहीं मिलती। गुरु के विधान-रूप कवच को बिना जाने जो जप करता है, उसका परिश्रम व्यर्थ होता है। मन्त्र और पूजनों से सिद्धि नहीं मिलती। गुरु-चरणों को आगे कर कल्याणकारी कवच को जब साधक प्राप्त करता है, तब उसे मन्त्र और यन्त्र की सिद्धि मिल जाती है। हे सुमुखि ! अत्यन्त गोपनीय भाव से इसका जप करना चाहिए, किसी से बताना नहीं चाहिए।

॥ विधि-सहित श्रीगुरु-कवच-स्तोत्र ॥

पृष्ठ १६–२० में प्रकाशित विनियोग, ऋष्यादि-न्यास, कर-न्यास और अङ्ग-न्यास कर ध्यान करे–

मानवीय मुखवाले सिद्ध-गुरुओं का स्वरूप द्वि-भुज और द्वि-नेत्र है, जो संसार के दुःखों को शान्त करता है। समस्त अलङ्कारों से सज्जित शक्ति द्वारा उस स्वरूप का बाँयाँ अङ्ग सुशोभित है। ऐसे स्वरूप का ध्यान कर जप करने से वह सभी सिद्धियों का फल प्रदान करता है।

इस प्रकार ध्यान कर पृष्ठ २० पर उल्लिखित मानस पूजन कर कवच-स्तोत्र का पाठ करे—

॥ कवच-स्तोत्र ॥

ॐ नमस्कार। प्रकाशानन्दनाथ सदा मेरी शिखा की रक्षा करें, पर-शिवानन्दनाथ मेरे शिर की सदा रक्षा करें ॥१॥ पर-शक्ति-दिव्यानन्दनाथ भाल (कपाल) की रक्षा करें और सबको धारण करने-वाले कामेश्वरानन्दनाथ मुख की रक्षा करें ॥२॥ हे देवि ! दिव्यौघ मस्तक और सारे शिर की रक्षा करें। हे प्रिये ! सिद्धौघ गुरु कण्ठ से लेकर नाभि तक रक्षा करें ॥३॥ भोगानन्दनाथ गुरु दाईं भुजा की रक्षा करें और समयानन्दनाथ निरन्तर हृदय की रक्षा करें ॥४॥ सहजानन्दनाथ कटि (कमर) और नाभि की रक्षा करें। इन स्थानों में सिद्धौघ गुरु सदा रक्षा करें ॥५॥ हे कुल-नायिके ! अधर में मानवौघ गुरु और दोनों गुल्फों (घुटनों) में गगनानन्दनाथ सदा रक्षा करें ॥६॥ नीलौघानन्दनाथ पैर के पिछले भाग की रक्षा करें और स्वात्मानन्दनाथ गुरु पैर की अँगुलियों की रक्षा करें ॥७॥ कन्दोलानन्द-नाथ सदा पैर के तलवों की रक्षा करें। इस प्रकार मानवौघ गुरुओं का न्यास (स्थापन) नाभि से पैरों तक करे ॥८॥ पृथ्वी पर मेरे गुरु रक्षा करें, जल में परम गुरु और हे शिव-प्रिये ! अग्नि में परापर गुरु रक्षा करें ॥९॥ वायु-मण्डल में परमेष्ठी-गुरु रक्षा करें और साक्षात् शिवादि गुरु सदा आकाश में रक्षा करें ॥१०॥

गुरु इन्द्र पूर्व में रक्षा करें, आग्नेय-कोण में गुरु अग्नियाँ, दाईं ओर गुरु यम और नैर्ऋत-कोण में निर्ऋति रक्षा करें।११। पश्चिम में गुरुण वरुण (जल-देव), वायव्य कोण में गुरु मारुत (पवन देव), उत्तर में धनद (कुबेर) और ऐशान कोण में गुरु ईश्वर रक्षा करें ॥१२॥ ऊपर गुरु ब्रह्मा और नीचे गुरु अनन्त रक्षा करें। इस प्रकार दसों दिशाओं की रक्षा क्रमशः इन्द्रादि गुरु करें ॥१३॥ शिर से पैर तक दिव्यौघ की सिद्धियाँ रक्षा करें और मानवौघ गुरु सदैव व्यापक रूप से रक्षा करें ॥१४॥ सभी स्थानों में गुरु-रूप से उत्तम साधक की रक्षा करें। बुद्धिमान् साधक को सदैव आत्मा को और मन्त्र को गुरु-रूप में ध्यान करना चाहिए ॥१५॥

(शेष पृष्ठ २४ पर)

(२)

ब्रह्म-यामले नारद-ब्रह्म-सम्वादे

श्रीमद्-गुरु-कवचम्

॥ नारद उवाच ॥

ब्रह्मन् ! गुरोर्मनु - स्तोत्रं, यथावदवधारितम् ।
कवच - श्रवणे श्रद्धा, साम्प्रतं कथ्यतां मम ॥१

॥ ब्रह्मोवाच ॥

श्रीगुरोः कवचं गुह्यं, वर्ण्यमानं निबोध मे ।
नाभक्ताय प्रदातव्यं, देयं भक्ति - मते सदा ॥२

विनियोग—ॐ अस्य श्रीगुरु-कवचस्य श्री ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, त्रि-देवात्मा अमुक-नाम-श्रीगुरुः देवता, अमुक-नाम-श्रीगुरुदेव-प्रीतये पाठे विनियोगः ।[*]

ऋष्यादि-न्यासः—श्रीब्रह्मर्षये नमः शिरसि । अनुष्टुप्-छन्दसे नमः मुखे । त्रि - देवात्मा अमुक-नाम-श्रीगुरुदेवाय नमः हृदि । अमुक-नाम-श्रीगुरुदेव-प्रीतये पाठे विनियोगाय नमः अञ्जलौ ।

॥ कवच-स्तोत्रम् ॥

ॐ शिरो मे सर्वदा पातु, गुरुः सर्वाङ्ग - सुन्दरः ।
उद्यद्-भाल - ललाटं मे, कृपा - दृष्टिर्दृशौ मम ॥१
मन्द-स्मितो मुखं पातु, श्रुती च मधुरं वचः ।
हृदयं पातु मन्त्रोक्तिर्वराभय - धरः करौ ॥२
गुरु - पद्मासनं पातु, नाभ्यादि - चरणान्तिकम् ।
गुरु - पाद - नख - ज्योत्स्ना, सर्वाङ्गं सर्वदाऽवतु ॥३
वाग्-बीजं मे सदा पातु, कामाद्यन्तांश्च खेचरी ।
आनन्द-भैरवः पातु, सदैवानन्द - मन्दिरम् ॥४
आनन्द - भैरवी पातु, ममानन्दं सदैव सा ।
हिंस्रेभ्यः सर्वदा पातु, श्रीप्रासाद - परो मनुः ॥५
परा-प्रासाद - मन्त्रस्तु, पातु नित्यं विपद् - दशाम् ।
हंसः पीठं पातु चोर्ध्वं, सर्व - दिक्षु सदाऽवतु ॥६
कुलं तु गुरवः पान्तु, पात्वधः कमलासनः ।

**[*] श्रीगुरोः कवचस्यास्य, ब्रह्मर्षिः परिकीर्तितः ।
छन्दोऽनुष्टुप् देवता च, त्रि-देवात्मा गुरुः स्वयम् ॥**

ज्ञानं पातु च दिव्यौघा, इच्छां सिद्धौघ - संज्ञकः ।
मानवौघाः क्रियां पान्तु, श्रीगुरुः सर्वदाऽवतु ।।७

फल-श्रुति

ॐ इतीदं कवचं नित्यं, प्रातः - कृत्यावसानके ।
यः पठेन् मानवो भक्त्या, त्रैलोक्य - विजयी भवेत् ।।१
मन्त्र - सिद्धिर्भवेत् तस्य, देवता च प्रसीदति ।
सत्यं सत्यं पुनः सत्यं, नात्र कार्या विचारणा ।।२
गुर्वभिधानं कवचमज्ञात्वा क्रियते जपः ।
वृथा श्रमो भवेत् तस्य, न सिद्धिर्मन्त्र - पूजने ।।३
गुरु - पादं पुरस्कृत्य, कवचं पठ्यते शुभम् ।
तदा मन्त्रस्य यन्त्रस्य, सिद्धिर्भवति नान्यथा ।।४
गुरु-गोप्यं च कर्त्तव्यं, न वक्तव्यं कदाचन ।
यस्मै कस्मै न दातव्यं, न प्रकाश्यं कदाचन ।।५
दातव्यं भक्ति - युक्ताय, कुलीनाय विशेषतः ।
त्रैलोक्य - दुर्लभं चैतद्, भुक्ति-मुक्ति - फल-प्रदम् ।।६
सर्व-तीर्थ - फलं येन, पठ्यते कवचं गुरोः ।
इति ते कथितं पुत्र ! सावधानोऽवधारय ।।७

(पृष्ठ २२ का शेषांश)

।। फल-श्रुति ।।

यह 'गुरु कवच' ब्रह्म-लोक में भी दुर्लभ है। तुम्हारे प्रेम से मैंने इसे कहा है। हे प्रिये ! अन्य किसी से नहीं कहा है ।।१।। पूजा के समय में, विशेष कर जप करते समय, हे देवि ! तीनों लोकों में दुर्लभ यह कवच भोग और मोक्ष-रूपी फल प्रदान करता है ।।२।। हे देवि ! जो गुरु के 'कवच' का पाठ करताहै, उसे सभी मन्त्रों का, सभी यन्त्रों का और सभी तीर्थों का पूरा फल प्राप्त होता है ।।३।। किसी शुभ दिन में, भोज-पत्र पर, अष्ट-गन्ध से चक्र के सहित कवच को भक्ति-पूर्वक लिखे और धूप-दीपादि से उसकी पूजा कर गुरु-मन्त्र द्वारा मिश्री-युक्त सुधा द्वारा साधक पवित्र मन से तर्पण करे। फिर उसे धारण करे, तो हे देवि ! इस संसार में वह भूत-भय को दूर करता है। मन्त्र-साधक तीनों कालों (प्रातः, मध्याह्न, सायं) में कवच का पाठ करे, तो वह संसार के बन्धन से छूट जाता है। इस प्रकार यह श्रेष्ठ 'कवच' दिव्य-सिद्धौघों की कला से समन्वित है ।।४-६।।

हिन्दी श्रीमद्-गुरु-कवच

॥ पूर्व-पीठिका ॥

श्री नारद बोले—हे ब्रह्मन् ! गुरु-मन्त्र के स्तोत्र को यथा-विधि समझ लिया है। अब कवच सुनने की मेरी श्रद्धा है, उसे कहिए।

श्री ब्रह्मा ने कहा—श्रीगुरु का गोपनीय कवच कहता हूँ, मुझसे सुनो। भक्ति-हीन को इसे नहीं देना चाहिए, सदैव भक्ति-युक्त को ही यह देने योग्य है।

॥ सविधि श्रीमद्-गुरु-कवच-स्तोत्र ॥

पहले पृष्ठ २३ के अनुसार विनियोग और ऋष्यादि-न्यास कर लें, तब कवच-स्तोत्र का पाठ करें। यथा—

सर्वाङ्ग-सुन्दर गुरुदेव सदैव मेरे शिर, भाल और ललाट की रक्षा करें तथा उनकी कृपा-दृष्टि मेरे दोनों नेत्रों की रक्षा करे ॥१

गुरुदेव की मन्द मुस्कान मेरे मुख की और उनकी मधुर वाणी मेरे कानों की रक्षा करे। उनके मन्त्रात्मक वचन मेरे हृदय की और उनके वर-अभय धारण करनेवाले कर-कमल मेरे हाथों की रक्षा करें ॥२

गुरुदेव का पद्मासन मेरी नाभि से चरणों तक के शरीर की रक्षा करे और गुरुदेव के चरणों की नख-चन्द्रिका सदैव मेरे सारे अङ्गों की रक्षा करे ॥३

वाग्-बीज (ऐं) सदा कामादि से खेचरी तक मेरी रक्षा करे। आनन्द-भैरव मेरे आनन्द-मन्दिर की रक्षा करें ॥४

आनन्द-भैरवी सदा ही मेरे आनन्द की रक्षा करें और श्रीप्रासाद-परा मन्त्र सदैव हिंसक प्राणियों से मेरी रक्षा करे ॥५

श्री परा-प्रासाद मन्त्र प्रति-दिन विपत्ति की दशा से मेरी रक्षा करे। हंस-पीठ ऊर्ध्व प्रदेश में और सभी दिशाओं में सदा मेरी रक्षा करे ॥६

गुरु लोग मेरे कुल की रक्षा करें, कमलासन अधो प्रदेश में मेरी रक्षा करे। दिव्यौघ गुरु मेरे ज्ञान की, सिद्धौघ नामक गुरु मेरी इच्छा की तथा मानवौघ गुरु मेरी क्रिया की रक्षा करें, श्री गुरुदेव सदैव मेरी रक्षा करें ॥७

॥ फल-श्रुति ॥

इस 'कवच' को जो मनुष्य भक्ति-पूर्वक प्रतिदिन प्रातःकृत्य के अन्त में पढ़ता है, वह तीनों लोकों में विजयी होता है ॥१॥ उसे मन्त्र की सिद्धि मिलती है और देवता उस पर प्रसन्न होता है। यह सत्य है, सत्य है, बारम्बार सत्य है, इसमें कुछ भी विचार करने की बात नहीं है ॥२॥ गुरु-नामक 'कवच' को जाने बिना जो जप करता है, उसका परिश्रम व्यर्थ होता है। उसे मन्त्र-पूजन में सिद्धि नहीं मिलती ॥३॥ गुरु-चरणों को आगे करके कल्याणकारी कवच का पाठ किया जाता है। तब मन्त्र-यन्त्र की सिद्धि होती है, अन्यथा नहीं ॥४॥ गुरु को गोपनीय रखना चाहिए, कभी उनको प्रकट नहीं करना चाहिए। जिस किसी को 'गुरु-कवच' न देना चाहिए और न ही उसे प्रकाशित करना चाहिए ॥५॥ भक्ति से युक्त, विशेषकर कुलीन व्यक्ति को ही, तीनों लोकों में दुर्लभ, भोग-मोक्ष को फल-रूप में देनेवाले इस 'कवच-स्तोत्र' को देना चाहिए ॥६॥ गुरुदेव के इस कवच को जो पढ़ता है, उसे सभी तीर्थ-स्थानों का फल मिल जाता है। तुमसे यह सब कहा है, सावधानी से इसे हृदयङ्गम करो ॥७॥

(४)

कङ्काल-मालिनी-तन्त्रे · ईश्वर-देवी-सम्वादे

श्रीगुरु-कवचम्

॥ पूर्व-पीठिका ॥

॥ श्रीदेव्युवाच ॥

भूत - नाथ ! महा - देव ! कवचं तस्य मे वद ।
गुरु-देवस्य देवेश ! साक्षात् ब्रह्म - स्वरूपिणः ॥१

॥ श्री ईश्वर उवाच ॥

अथ ते कथयामीशे ! कवचं मोक्ष - दायकम् ।
यस्य ज्ञानं विना देवि ! न सिद्धिर्न च सद्-गतिः ॥२
ब्रह्मादयोऽपि गिरिजे ! सर्वत्र जयिनः स्मृताः ।
अस्य प्रसादात् सकला, वेदागम - पुरःसराः ॥३

॥ सविधि श्रीगुरु-कवचम् ॥

विनियोगः—ॐ अस्य श्रीगुरु-कवचस्य श्रीविष्णुः ऋषिः, विराट्-छन्दः, गुरुदेव स्वयं शिवः देवता, चतुर्वर्गे ज्ञान-मार्गे पाठे विनियोगः ।

ऋष्यादि-न्यासः—श्रीविष्णु-ऋषये नमः शिरसि । विराट्-छन्दसे नमः मुखे । गुरुदेव-स्वयं-शिव-देवतायै नमः हृदि । चतुर्वर्गे ज्ञान-मार्गे पाठे विनियोगाय नमः अञ्जलौ ।

सहस्रारे महा - पद्मे, कर्पूर - धवलो गुरुः ।
वामोरु - स्थित[१] -शक्तिर्यः सर्वत्र[२] परि - रक्षतु ॥१
परमाख्यो गुरुः पातु, शिरसं मम वल्लभे !
परा-पराख्यो नासां मे, परमेष्ठी[३] मुखं सदा ॥२
कण्ठं मम सदा पातु, भैरवानन्द - नाथकः[४] ।
बाहौ[५] द्वौ सनकानन्दः, कुमारानन्द एव च[६] ॥३
वशिष्ठानन्द - नाथश्च, हृदयं पातु सर्वदा ।
क्रोधानन्दः कटिं पातु, सुखानन्दः पदं मम ॥४
ध्यानानन्दश्च सर्वाङ्गं, बोधानन्दश्च कानने ।
सर्वत्र गुरवः पान्तु, सर्वे ईश्वर - रूपिणः ॥५

॥ फल-श्रुति ॥

इति ते कथितं भद्रे ! कवचं परमं शिवे !
भक्ति - हीने दुराचारे, दद्यान्मृत्युमवाप्नुयात् ॥१

अस्यैव पठनाद् देवि ! धारणात् श्रवणात् प्रिये !
जायते मन्त्र-सिद्धिश्च [7] किमन्यत् कथयामि ते ।।२
कण्ठे वा दक्षिणे बाहौ, शिखायां वीर - वन्दिते ।
धारणान्नाशयेत् पापं, गङ्गायां कल्मषं[8] यथा ।।३
इदं कवचमज्ञात्वा, यदि मन्त्रं जपेत् प्रिये !
तत् सर्वं निष्फलं कृत्वा, गुरुर्याति सुनिश्चितम् ।
शिवे रुष्टे गुरुस्त्राता, गुरौ रुष्टौ न कश्चन ।।४

पाठान्तर—[1] गत, [2] सर्वतः, [3] परमेष्ठिः, [4] प्रह्लादानन्द-नाथकः, [5] बाहू, [6] नाथकः, [7] मन्त्राः सिद्धाश्च जायते, [8] कलुषं ।

हिन्दी श्रीगुरु-कवच

श्री देवी बोलीं— हे भूत-नाथ, महादेव, देवेश्वर ! साक्षात् ब्रह्म-स्वरूप उन गुरुदेव का कव मुझसे कहिए ।।१।।

श्री ईश्वर ने कहा—हे देवि, ईश्वरि ! अब मैं तुमसे मोक्ष-प्रद कवच को कहता हूँ, जिसे जा बिना न सिद्धि मिलती है और न सद्-गति ।।२ ।। हे गिरिजे ! इसके प्रसाद से ही समस्त तन्त्र-शास्त्र क आगे रखनेवाले ब्रह्मा आदि भी सभी स्थानों में विजयी माने जाते हैं ।।३।।

।। सविधि श्रीगुरु-कवच ।।

पहले पृष्ठ २६ के अनुसार विनियोग एवं ऋष्यादि-न्यास करे । तब कवच-स्तोत्र का पाठ करे

सहस्रार के महान् पद्म में कपूर के समान उज्ज्वल वर्णवाले गुरुदेव, जिनकी जाँघ से सटीं उनकी शक्ति (धर्म-पत्नी) विराजमाना हैं, सभी स्थानों में मेरी रक्षा करें ।। १ ।। हे प्रिये ! 'परम' नामक मेरे सिर की, 'परापर' नामक मेरी नासिका की और 'परमेष्ठी' मेरे मुख की सदा रक्षा करें ।। २ ।। भैरवानन्दनाथ मेरे कण्ठ की और सनकानन्दनाथ तथा कुमारानन्दनाथ मेरी दोनों भुजाओं की सद रक्षा करें ।। ३ ।। वशिष्ठानन्दनाथ सदैव मेरे हृदय की रक्षा करें और क्रोधानन्दनाथ मेरी कटि (कमर) की तथा सुखानन्दनाथ मेरे पैरों की रक्षा करें ।। ४ ।। ध्यानानन्दनाथ मेरे सारे शरीर की, बोधानन्दनाथ वन-उपवन में, और ईश्वर-स्वरूप सभी गुरु समस्त स्थानों में मेरी रक्षा करें ।। ५ ।।

।। फल-श्रुति ।।

हे भद्रे, शिवे ! यह श्रेष्ठ 'कवच' कहा है । भक्ति-हीन, दुराचारी व्यक्ति को इसे बताने से मृत्यु हो जाती है ।।१।। हे प्रिये, देवि ! इसका पाठ या श्रवण करने से या इसे धारण करने से मन्त्र सिद्ध होते हैं । और तुमसे क्या कहूँ ? ।।२ ।। हे वीर-वन्दिते ! कण्ठ में, दाईं भुजा में या शिखा में इसे रखने से यह पापों को उसी प्रकार नष्ट करता है, जैसे गङ्गा में पातक नष्ट हो जाते हैं ।।३।। हे प्रिये ! इस कवच को जाने बिना यदि कोई मन्त्र का जप करता है, तो वह व्यर्थ होता है और गुरुदेव उसे त्यागकर चले जाते हैं, यह सर्वथा निश्चित है । शिव के रुष्ट होने पर गुरुदेव रक्षा करते हैं, किन्तु गुरु के रुष्ट होने पर कोई रक्षा नहीं करता ।।४।।

(९)

ब्रह्म-यामले पार्वती-ईश्वर-सम्वादे

समस्त-मंगलं नाम स्त्री-गुरु-कवचम्

।। पूर्व-पीठिका ।।

।। श्रीदेव्युवाच ।।

इदानीं स्त्री-गुरोः तु, कवचं मयि कथ्यताम् ।
यस्य विज्ञान-मात्रेण, पुनर्जन्म न विद्यते ।।

।। श्री शिव उवाच ।।

स्त्री-गुरोश्चापि देवेशि ! कवचं शृणु सादरम् ।
यस्य श्रवण-मात्रेण, वागीश-समतां व्रजेत् ।।

।। सविधि समस्त-मङ्गल नाम स्त्री-गुरु-कवचम् ।।

विनियोगः—ॐ अस्य स्त्री-गुरोः कवचस्य श्री सदा-शिव ऋषिः, अमुक-नामा स्त्री-गुरुः देवता, अमुक-नामा स्त्री-गुरु-देवता-प्रीतये विनियोगः । [※]

ऋष्यादि-न्यासः—श्रीसदा-शिव-ऋषये नमः शिरसि । अमुक-नामा-स्त्री-गुरु-देवतायै नमः हृदि । अमुक-नामा-स्त्री-गुरु-देवता-प्रीतये पाठे विनियोगाय नमः अञ्जलौ ।

।। ईश्वर उवाच ।।

ॐ क्लीं बीजं मे शिरः पातु, तदाख्या च[१] ललाटकम् ।
क्लीं बीजं चक्षुषोः पातु, सर्वाङ्गं मे सदा-शिवः[२] ।।१
ऐं बीजं मे मुखं पातु, ह्रीं जिह्वां[३] परि-रक्षतु ।
श्रीं-बीजं स्कन्ध-देशं मे, हसखफ्रें[४] भुज-द्वयम् ।।२
ह-कारः कण्ठ-देशं मे, स-कारः षोडशं दलम् ।
क्ष-वर्णस्तदधः पातु, ल-कारो हृदयं मम[५] ।।३
व-कारः पृष्ठ-देशं च, र-कारो[६] दक्ष-पार्श्वकम् ।
यूङ्कारो[७] वाम-पार्श्वं[८] च, सकारो[९] मेरुमेव च ।।४
हकारो मे दक्ष-भुजं, क्षकारो वाम-हस्तकम् । [※]
मकारश्चांगुलि[१०] पातु, लकारः पातु मे नखम्[११] ।।५
वकारो[१२] मे नितम्बं च, रकारो[१३] जठरं मम ।
यीङ्कारः[१४] पाद-युगलं, ह्सौः सर्वाङ्गकेऽवतु[१५] ।।६

[※] स्त्री-गुरोः कवचस्य सदा-शिव ऋषिः स्मृतः ।
तदाख्या देवता प्रोक्ता, चतुर्वर्ग-फल-प्रदा ।।

ह्सौंलिङ्गं च लोमानि,[१६] केशं च परि - रक्षतु ।
ऐं बीजं पातु पूर्वे मे,[१७] ह्रीं बीजं दक्षिणेऽवतु ।।७
श्रीं बीजं पश्चिमे पातु, उत्तरे भूत- सम्भवम् ।
ऐं[१८] पातु चाग्नि-कोणे च, वेदाद्या[१९] नैर्ऋतेऽवतु ।।८
देव्यम्बा पातु वायव्यां, शम्भोः श्रीपादुकां तथा ।
पूजयामि तथा चोर्ध्वं, नमश्चाधः सदाऽवतु ॐ ।।९

।। फल-श्रुति ।।

इति ते कथितं, कान्ते ! कवचं परमाद्भुतम् ।
गुरु-मन्त्रं जपित्वा तु, कवचं प्रपठेद् यदि ।
स सिद्धः स गणः सोऽपि, शिवः साक्षान्न संशयः ।।१
पूजा-काले पठेद् यस्तु, कवचं मन्त्र - विग्रहम् ।
पूजा-फलं भवेत् तस्य, सत्यं सत्यं सुरेश्वरि !
त्रि-सन्ध्यं यः पठेद् देवि ! स सिद्धो नात्र संशयः ।।२
भूर्जे विलिख्य गुटिकां, स्वर्णस्थां धारयेद् यदि ।
तस्य दर्शन-मात्रेण, वादिनो निष्प्रभां गताः ।।३
विवादे जयमाप्नोति, रणे च नैर्ऋतेरिव[२०] ।
सभायां जयमाप्नोति, मम तुल्यो न संशयः ।।४
सहस्रारे भावयन् यः,[२१] त्रि-सन्ध्यं प्रपठेद् यदि ।
स एव सिद्ध[२२] - लोकेशो, निर्वाण - पदमीयते[२३] ।।५
समस्त - मङ्गलं नाम, कवचं परमाद्भुतम् ।
यस्मै कस्मै न दातव्यं, न प्रकाश्यं कदाचन ।।६
देयं शिष्याय शान्ताय, चान्यथा विफलं[२४] भवेत् ।
अभक्तेभ्यस्तु[२५] देवेशि ! पुत्रेभ्योऽपि न दर्शयेत् ।।७
इदं कवचमज्ञात्वा दश-विद्यां च यो जपेत्[२६] ।
स नाप्नोति फलं तस्य, परे च नरकं व्रजेत् ।।८

ऊपर प्रकाशित 'स्त्री-गुरु-कवच' बृहत् तन्त्रसार से उद्धृत है । 'मातृका-भेद तन्त्र' में भी यह कवच दिया है । उसके अनुसार अनेक पाठान्तर हैं ।

पाठान्तर निम्न प्रकार हैं—

पाठान्तर—१ तदाख्यातं, २ सदाऽवतु, ३ जङ्घां, ४ वाग्भवं मे,
५ हकारं मे दक्ष-भुजं, क्षकारं वाम-हस्तकम् ।
क्षसर्णौ तदधः पातु, लकारं हृदयं मम ।।३
६ रकारं, ७ जूं-कारं, ८ तु, ९ सकारं
[※] यह पंक्ति 'मातृका-भेद तन्त्र' में नहीं है ।
१० मकारं चांगुलीः, ११ लकारं मे नखोपरि, १२ वकारं, १३ रकारं, १४ यीःकारः, १५ सर्वाङ्ग-मेव तु, १६ लोमं च, १७ तु, १८ श्रीं, १९ तदाख्या, २० निऋतिरिव, २१ भावयस्तां, २२ सिद्धो, २३ पदमीहते, २४ पतनं, २५ अभक्तेभ्योऽपि, २६ विद्यां चैव च यो जपेत्

विज्ञ साधकों को इस विशिष्ट 'कवच' के शोधन के प्रति ध्यान देना चाहिए। इस सम्बन्ध में प्रामाणिक सूचना मिलने पर उसे सादर 'कौल-कल्पतरु' चण्डी में प्रकाशित किया जायगा।

हिन्दी समस्त-मंगल नामक स्त्री-गुरु-कवच

।। पूर्व-पीठिका ।।

श्री देवी बोलीं—अब मुझसे स्त्री-गुरु का कवच कहिए, जिसके जानने मात्र से पुनर्जन्म नहीं होता।

श्री शिव ने कहा—हे देवेशि! आदर के साथ स्त्री-गुरु-कवच को सुनो, जिसके सुनने मात्र से सुननेवाला वागीश्वर के समान हो जाता है।

।। सविधि समस्त-मङ्गल नामक स्त्री-गुरु-कवच ।।

पहले पृष्ठ २८ पर दिये विनियोग और ऋष्यादि-न्यास को करें। तब कवच का पाठ करें—

'क्लीं' बीज मेरे शिर की और उनका नाम मेरे ललाट की रक्षा करे। 'क्लीं' बीज दोनों नेत्रों की और सदा-शिव मेरे सारे शरीर की रक्षा करें ।।१।।

'ऐं' बीज मेरे मुख की रक्षा करे। 'ह्रीं' मेरी जीभ की रक्षा करे। 'श्रीं' बीज मेरे कन्धों की और 'ह्सखफ्रें' मेरी दोनों भुजाओं की रक्षा करे ।।२।।

'ह' मेरे कण्ठ-स्थान की, 'स' षोडश-दल-चक्र की, 'क्ष' नीचे के भाग की और 'ल' मेरे हृदय की रक्षा करे ।।३।।

'ब' पीठ की, 'र' दाएँ पार्श्व (बगल) की, 'यूं' बाएँ पार्श्व की और 'स' मेरु (?) की रक्षा करे ।। ४

'ह' दाईं भुजा की, 'क्ष' बाएँ हाथ की, 'म' अँगुलियों की और 'ल' मेरे नाखूनों की रक्षा करे ।।५

'व' मेरे नितम्ब की, 'र' मेरे पेट की, ईं दोनों पैरों की, 'ह्सौः' सभी अङ्गों की रक्षा करे ।।६

'ह्सौः' लिङ्ग और लोमों तथा केश की रक्षा करे। 'ऐं' बीज पूर्व में मेरी रक्षा करे। 'ह्रीं' बीज दक्षिण में रक्षा करे ।।७ (शेष पृष्ठ ३१ के नीचे)

कवच-पाठ के बाद स्तुति द्वारा श्रीगुरुदेव को प्रणाम करे—

श्रीगुरु-प्रणाम स्तुतिः

अखण्ड-मण्डलाकारं व्याप्तं येन चराचरम्, तत् पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।१
अज्ञान-तिमिरान्धस्य ज्ञानाञ्जन-शलाकया, चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।।२
देवतायाः दर्शनं च करुणा-वरुणालयम्, सर्व-सिद्धि-प्रदातारं, श्रीगुरुं प्रणमाम्यहम् ।।३
वराभय-करं नित्यं श्वेत-पद्म-निवासिनम्, महा-भय - निहन्तारं गुरुदेवं नमाम्यहम् ।।४
महा-ज्ञानाच्छादिताङ्गं नराकारं वर-प्रदम्, चतुर्वर्ग-प्रदातारं स्थूल-सूक्ष्म-दयान्वितम् ।।५
सदानन्द-मयं देवं नित्याञ्जन-निरञ्जनं, शुद्ध-सत्त्व-मयं देवं नित्य-कालं कुलेश्वरम् ।।६
ब्रह्म-रन्ध्रे महा-पद्मे तेजो-बिम्बे निराकुले, योगिभिर्योग-गम्ये च चारु-शुक्र-विराजिते ।।७

(पृष्ठ ३० का शेषांश)

'श्रीं' बीज पश्चिम में, उत्तर में भूत-सम्भव रक्षा करे । 'ऐं' अग्नि-कोण में और वेदाद्य (ॐ) नैऋत-कोण में रक्षा करे ।।८

देव्यम्बा वायव्य कोण में, श्री शम्भु श्रीपादुका की रक्षा करें । 'पूजयामि' शब्द ऊर्ध्व-भाग की और 'नमः' सदा अधो भाग की रक्षा करे ।।९

।। फल-श्रुति ।।

हे कान्ते ! इस प्रकार परम विलक्षण 'कवच' तुमसे कहा गया । गुरु-मन्त्र का जप कर यदि 'कवच' का पाठ करे, तो वह साधक 'सिद्ध' होता है, देवी का 'गण' होता है और वही साक्षात् 'शिव'-स्वरूप होता है, इसमें सन्देह नहीं ।।१

हे महेश्वरि ! जो पूजा के समय मन्त्रात्मक 'कवच' का पाठ करता है, उसे पूजा का पूरा फल मिलता है, यह सर्वथा सत्य है ।।२

भोज-पत्र में लिखकर, उसकी गुटिका बनाकर स्वर्ण में स्थापित कर यदि इसे धारण करे, तो धारण करनेवाले के दर्शन मात्र से विरोधी हत-प्रभ हो जाते हैं ।।३

विवाद में, युद्ध में और सभा में वह नैऋत्य के समान विजय पाता है और मेरे समान प्रतापी होता है, इसमें सन्देह नहीं ।।४

जो सहस्रार में भावना करते हुए, तीनों सन्ध्या-कालों में इसका पाठ करता है, वह सिद्ध लोकेश होकर निर्वाण-पद को प्राप्त करता है ।।५

'समस्त-मङ्गल' नामक यह 'कवच' अत्यन्त विलक्षण है । जिस किसी को इसे न देना चाहिए, कभी इसे प्रकट न करना चाहिए ।।६

शान्त शिष्य को ही इसे देना चाहिए, अन्यथा यह निष्फल हो जाता है । हे देवेशि ! पुत्रों को भी, यदि वे भक्ति-हीन हों, तो इसे नहीं दिखाना चाहिए ।।७

इस 'कवच' को जाने बिना जो दश महा-विद्याओं के मन्त्र का जप करता है, वह उस जप का फल नहीं पाता और अन्त में नरक को जाता है ।।८

सहस्र-दल-सङ्काशे कर्णिका-मध्य-मध्यके, महा-शुक्ल-भास्वरार्क-कोटि-कोटी-महौजसम् ।।८
सर्व-पीठस्थममलं पर-हंसं परात्परम्, वेदोद्धार-करं नित्यं काम्य - कर्म-फल-प्रदम् ।।९
सदा मनः-शक्ति-मयं लय-स्थान-पदाम्बुजं, शरज्ज्योत्स्ना-ज्वलन्नात्मा शोभेन्दु-कोटि-वन्मुखं ।१०
वांछातिरिक्त-दातारं सर्व-सिद्धीश्वरं गुरुम्, भजामि तन्मयो भूत्वा तं हंस-मण्डलोपरि ।।११
आत्मानं सुनिराकारं साकार-ब्रह्म-रूपिणम्, विद्यान् मन्त्र-प्रदातारं श्रीगुरुं परमेश्वरम् ।
सर्व-सिद्धि-प्रदातारं गुरुदेवं नमाम्यहम् ।।१२
कायेन मनसा वाचा ये नमन्ति निरन्तरम्, अवश्यं श्रीगुरोश्चैव पदाम्भोजे वसन्ति हि ।।१३

हिन्दी श्रीगुरु-प्रणाम-स्तुति

एक-निष्ठ भक्ति के साथ इस स्तुति द्वारा श्रीगुरुदेव को प्रणाम करे। इससे 'आयु' और 'आरोग्य' की वृद्धि होती है—

अखण्ड-मण्डलाकार, चर और अचर, सारा जगत् जिन परा - शक्ति के द्वारा व्याप्त है, उनके गौरव का जो दर्शन कराते हैं, उन श्रीगुरुदेव को नमस्कार। अज्ञान-रूपी अँधेरे से अन्धे व्यक्ति की आँखों को जो ज्ञान-रूपी अञ्जन की शलाका से खोल देते हैं, उन श्री गुरुदेव को नमस्कार। देवता के दर्शन और सर्व-सिद्धियों के देनेवाले दया-सागर श्री गुरुदेव को मैं प्रणाम करता हूँ। सदैव वर और अभय से युक्त हाथोंवाले, श्वेत कमल पर विराजमान रहनेवाले और बड़े-से-बड़े भय को नष्ट करनेवाले श्री गुरुदेव को मैं नमस्कार करता हूँ ।।१-४

महान् ज्ञान से व्याप्त शरीरवाले, मनुष्याकार, वर-दाता, चतुर्वर्ग (धर्म, अर्थ, काम, मोक्ष) के देनेवाले, स्थूल और सूक्ष्म दया-भाव से समन्वित, सदा आनन्द-मय रहनेवाले देवता-स्वरूप, सदैव निर्विकार शिव-स्वरूप, शुद्ध-सत्त्व-गुण से परिपूर्ण देवता, नित्य-काल एवं कुलेश्वर-स्वरूप, सभी पीठों पर विराजमान निर्मल, परात्पर, वेदोद्धार-कर्ता, काम्य कर्मों के फल को देनेवाले परमहंस-स्वरूप, सदा मनोबल से परिपूर्ण, मोक्ष-स्थान पर चरण-कमलों को रखनेवाले, शरद्-कालीन चाँदनी-जैसी उज्ज्वल आत्मावाले, करोड़ों चन्द्रमाओं की शोभावाले मुख-मण्डल से युक्त, मनोकामना से भी अधिक देनेवाले, सभी सिद्धियों के स्वामी, अत्यन्त उज्ज्वल चमकीले करोड़ों सूर्यों जैसे महान् ओजवाले श्री गुरुदेव का भजन मैं उनमें तन्मय होकर योगियों द्वारा अपनी योग-विद्या से ज्ञात किये जानेवाले, सुन्दर वीर्य-युक्त सहस्र-दल-कमल की कर्णिका के मध्य में हंस-मण्डल के ऊपर करता हूँ ।। ५-११

आत्मा से निराकार और साकार ब्रह्म-रूपी, विद्याओं और मन्त्रों के देनेवाले, सभी सिद्धियों के प्रकृष्ट दाता, परमेश्वर श्री गुरुदेव को मैं नमस्कार करता हूँ ।।१२

फल-श्रुति

शरीर, मन और वाणी से जो सदैव इस प्रकार नमस्कार करते हैं, वे निश्चय ही श्रीगुरुदेव के चरण-कमलों में निवास करते हैं ।।१३

बिहार में शक्ति-साधना
बिहार में शक्ति-साधना
बिहार में शक्ति-साधना
बिहार में शक्ति-साधना
मूल्य
रु० दस
मात्र
इतिहास एवं
प्रेरणा-दायक व्यक्तित्व पर
प्रकाश डालनेवाली सुन्दर पुस्तक।

मेरी भक्ति • गुरू की शक्ति • फुरो मन्त्र • ईश्वरो वाचा •

शाबर मन्त्र-संग्रह

मेरी भक्ति • गुरू की शक्ति • फुरो मन्त्र • ईश्वरो वाचा •

विधि-सहित शाबर-मन्त्रों का शोध-पूर्ण संग्रह

छः भागों में

छहों भागों का मूल्य १०५-०० रु०

प्राप्ति-स्थानः चण्डी-कार्यालय, अलोपीबाग मार्ग, प्रयाग-२११००६ (उ०प्र०)